# समासः

## (Compound)

प्रस्तुतिः

डॉ. कुलदीपशर्मा


राष्ट्रियसंस्कृतसंस्थानम्, जयपुरपरिसरः, जयपुरम्

# तस्मै पाणिनये नमः




येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥

अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मिलितं येन तस्मै पाणिनये नमः॥



छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते,
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्,
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते॥

## १. समासस्य व्युत्पत्तिः लक्षण च –

सम्+अस्+घञ् = समासः सङ्क्षेपः। समसनं पदयोः पदाना वा एकपदीकरणं समासः। समसन सङ्क्षिप्तीकरण समासः इति। अथवा बहूनां पदानामकोभवनं समासः इति। एकार्थवाचकता प्राप्तः भिन्नार्थकानेकपदसमूहः समासः। अभिधानाश्रितलोपाभावाद् अन्यमध्यवर्तिविभक्तिशून्यसमुदायत्वं समासत्वम्।

## २. **समासस्य भेदाः** मध्यसिद्धान्तकौमुद्यनुसार समासः पञ्चधा –

**समासः**

- कवल– समासः
- अव्ययीभाव– समासः
- तत्पुरुष– समासः
- बहुव्रीहि– समासः
- द्वन्द्व– समासः

## १. केवलसमासः –

विशेषसञ्ज्ञाविनिर्मुक्तः केवलसमासः, विशेषाश्च ताः संज्ञाः विशेषसञ्ज्ञा अव्ययीभावतत्पुरुषबहुव्रीहयादयः ताभिर्विनिर्मुक्तो रहितो विशेषसञ्ज्ञाविनिर्मुक्तः केवलसमासः कथ्यते।

यथा – भूतपूर्वः – पूर्वं भूतः भूतपूर्वः।

व्याकरणशास्त्रस्य वृत्तयः –

व्याकरण शास्त्रस्य पञ्चवृत्तयः भवन्ति – कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्चवृत्तयः सन्ति।

विग्रहः – वृत्यर्थावबोधक वाक्य विग्रहः इति। पञ्चवृत्तीनामर्थस्यावबोधक वाक्य विग्रहः इति।

**विग्रहः**

**लौकिकः** **अलौकिकः**

**वृत्तिः** – परार्थाभिधान वृत्तिः। प्रत्ययान्तभावेन–अपरपदार्थान्तरभावेन वा यो विशिष्टोऽर्थः सः परार्थः, सोऽभिधीयते येन तत्परार्थाभिधानमिति।

१. **सह सुपा ( २–१–४ ) सुप सुपा सह वा समस्यते। भूतपूर्वः।**

## २. अव्ययीभावसमासः

प्रायेण पूर्वपदार्थ प्रधानोऽव्ययीभावः। अर्थात् यत्र पूर्वपदार्थस्य प्राधान्यं भवति तत्र अव्ययीभावसमासः भवति। अस्मिन् समासे पूर्वपदम् अव्ययम्, उत्तरपदञ्च अनव्ययं भवति। अनव्ययम् अव्ययं भवतीति अव्ययीभावः।

१. **अव्ययीभावः ( २-१-५ )**

अधिकारोऽय प्राक तत्पुरुषात।

२. **अव्यय विभक्ति समोपसमद्धिव्यृदध्यर्था भावात्ययाऽस शब्दप्रादुर्भावपश्चाद्यथाऽऽनुपूर्व्यऽ-यौगपद्यसादृश्यस कल्यान्तवचनेषु।( २-१-६ )**

# २. अव्ययीभावसमासः

अय अव्ययीभावसमासः प्रायः अधोलिखितेषु अर्थेषु भवति –

अव्ययीभावः

| अर्थः | विग्रहः | समस्तपदम् |
| --- | --- | --- |
| विभक्ति–अर्थे | हरौ | अधिहरि |
| समोप–अर्थे | कष्णस्य समोपम् | उपकृष्णम् |
| समद्धि–अर्थे | मद्राणा समद्धिः | सुमद्रम् |
| व्यृद्धि–अर्थे | यवनाना व्यृद्धिः | दुर्यवनम् |
| अर्थाभाव–अर्थे | मक्षिकाणाम् अभावः | निर्मक्षिकम् |
| अत्यय–अर्थे | हिमस्य अत्ययः | अतिहिमम् |
| अस –अर्थे | निद्रा स न युज्यते | अतिनिद्रम् |
| शब्दप्रादुर्भाव–अर्थे | हरिशब्दस्य प्रकाशः | इतिहरि |
| पश्चात–अर्थे | विष्णोः पश्चात | अनुविष्णु |

## यथा

| वीप्सा–अर्थे | योग्यता–अर्थे | अनतिक्रमण–अर्थे | सादृश्य–अर्थे |
|---|---|---|---|
| दिने–दिने | रूपस्य योग्यम् | शक्तिमनतिक्र | हरेः सादृश्यम् |
| (प्रतिदिनम्) | (अनुरूपम्) | (यथाशक्ति) | (सहरि) |

| | | |
|---|---|---|
| आनुपूर्व्य–अर्थे | ज्येष्ठस्य आनुपूर्व्येण | अनुज्येष्ठम् |
| यौगपद्य–अर्थे | चकण युगपत् | सचक्रम् |
| सादृश्य–अर्थे | हरेः सादृश्यम् | सहरि |
| स –अर्थे | क्षत्राणां स | सक्षत्रम् |
| साकल्य–अर्थे | तृणम् अपरित्यज्य | सतृणम् (अत्ति) |
| अन्त–अर्थे | अग्नि ग्रन्थपर्यन्तम् (अधीते) | साग्नि |

# तत्पुरुषसमासः

प्रायेणोत्तरपदार्थप्रधानस्तत्पुरुषः। अर्थात यत्र समस्ते पदे उत्तरपदस्य प्राधान्य स्यात तत्र तत्पुरुषः समासो जायते। अस्मिन् समासे द्वितीया–तृतीया–चतुर्थी–पञ्चमी–षष्ठी–सप्तमी–एषां विभक्तीनां लोपो भवति। समासे जाते यस्याः विभक्तेः लोपो भवति। तस्या विभक्तेः एव नामा तत्पुरुषसमासस्य नामोच्चारणं क्रियते।

## तत्पुरुषसमासः

- (१) द्वितीया तत्पुरुषः
- (२) तृतीया तत्पुरुषः
- (३) चतुर्थी तत्पुरुषः
- (४) पञ्चमी तत्पुरुषः
- (५) षष्ठी तत्पुरुषः
- (६) सप्तमी तत्पुरुषः

१. **द्वितीया तत्परुषः:-**

**सूत्रम् – द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः (२–१–२४)**

वृत्तिः –द्वितीयान्तं श्रितादिप्रकृतिकैः सुबन्तैः सह वा समस्यते।

उदाहरणानि – कृष्णश्रितः। दुःखातीतः। दुःखपतितः। शोकगतः। मेघात्यस्तः। भयप्राप्तः। जीविकापन्नः।

२. **तृतीया तत्पुरुषः –**

**सूत्रम् – तृतीया तत्कृतार्थेन गुणवचनेन (२–१–३०)**

वृत्तिः – तृतीयान्तं तृतीयान्तार्थकृतगुणवचनेन अर्थेन च सह समस्यते।

उदाहरणानि – शङ्कुलाखण्डः। धान्यार्थः।

सूत्रम् – पूर्वसदृशसमोनार्थकलहनिपुणमिश्र श्लक्ष्णैः (२–१–३१)

वृत्तिः – पूर्व–सदृश–सम–ऊनार्थ–कलह–निपुण–मिश्र–श्लक्ष्ण–एतैः सह तृतीयान्तं पदं समस्ते।

उदाहरणानि – मासपूर्वः। मातृसदृशः। पितृसमः। माषोनम्। माषविकलम्। वाक्कलहः। आचारनिपुणः।

गुडमिश्रः। आचारश्लक्ष्णः।

**सूत्रम् – कर्तृकरणे कृता बहुलम् (२–१–३२)**

वृत्तिः – कर्तरि करणे च या तृतीया तदन्तं यत्पदं तस्य कृदन्तेन सह समासो भवति।

उदाहरणानि – हरित्रातः। नखभिन्नः।

३. चतुर्थी समासः -

सूत्रम् - चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः ( २-१-३६ )

वृत्तिः - तदर्थ-अर्थ-बलि-हित-सुख-रक्षित-एभिः षड्भिः सह यः समासो भवति तत्र चतुर्थी समास इति जायते।

उदाहरणानि - यूपदारु। द्विजार्थं पयः। भूतबलिः। गोहितम्। गोसुखम्। गोरक्षितम्।

४. पंचमी विभक्तिः -

सूत्रम् - पञ्चमी भवेन ( २-१-३७ )

वृत्तिः - पञ्चम्यन्तस्य पदस्य भयवाचकेन समर्थसुबन्तेन सह समासो भवति।

उदाहरणानि - चोरभयम्। शत्रुभयम्। राजभयम्।

सूत्रम् - अपेतापोढमुक्तपतितापत्रस्तैरल्पशः ( २-१-३८ )

वृत्तिः - अपेत-अपोढ-मुक्त-पतित-अपत्रस्त-एतैः सहाल्पं पञ्चम्यन्तं समस्यते, स तत्पुरुष समास इति।

उदाहरणानि - सुखापेतः। कल्पनापोढः। रोगमुक्तः। पापमुक्तः। प्रासादपतितः। वृक्षपतितः। अश्वपतितः।

५. **षष्ठी विभक्तिः –**

सूत्रम् – षष्ठी ( २–२–८ )

**वृत्तिः – षष्ठ्यन्तं पदं समर्थेन सुबन्तेन सह समस्यते।**

उदाहरणानि – राजपुरुषः। ईश्वरभक्तः। शिवभक्तः। देवपूजकः। मूर्तिपूजा। देवपूजा। विद्यालयः। देवालयः। देवमन्दिरम्। सुवर्णकुण्डलम्।

६. **सप्तमी विभक्तिः –**

**सूत्रम् – सप्तमी शौण्डैः ( २–१–४० )**

वृत्तिः – सप्तम्यन्तं शौण्डादिभिः सह समस्यते।

उदाहरणानि – अक्षशौण्डः। शास्त्रनिपुणः। विद्यानिपुणः। युद्धनिपुणः। कार्यदक्षः। कार्यचतुरः। जललीनः। जलमग्नः।

**तत्पुरुषस्य भेदौ**

**कर्मधारयः** | **द्विगुः**

**सूत्रम् – विशेषणं विशेष्येण बहुलम् ( २–१–५७ )**

वृत्तिः – भेदकं समानाधिकरणेन बहुलं समस्यते स कर्मधारय इति।

उदाहरणानि – नीलोत्पलम्। कृष्णसर्पः। कृष्णागौः। रक्तोपलम्।

**सूत्रम् – संख्यापूर्वो द्विगुः ( २–१–५२ )**

वृत्तिः – 'तद्धितार्थोत्तरपदसमाहारे च' इत्यनेन सूत्रेण विहितस्य संख्यापूर्वस्य समासो द्विगुसंज्ञकः स्यादिति।

उदाहरणानि – पञ्चगवम्। त्रिलोकम्। त्रिभुवनम्। चतुर्युगम्।

# बहुव्रीहिसमासः

प्रायेणान्यपदार्थप्रधानो बहुव्रीहिसमासश्चतुर्थः। अस्मिन् समासे समस्यमानं पदं प्रायेण प्रथमान्तमेव भवति, एवञ्चात्र यम्, येन, यस्मै, यस्मात्, यस्य, यस्मिन् इति प्रयुज्य तत्तद्विभक्तीनां बोधो भवति। बहुव्रीहि समासो द्विधा – (१) समानाधिकरणबहुव्रीहिः (२) व्यधिकरणबहुव्रीहिः। समानाधिकरणो बहुव्रीहिः द्वेधा – (१) द्विपदः (२) बहुपदः। द्विपदोऽपि बहुव्रीहिसमासः षड्विधः – (१) द्वितीया बहुव्रीहिः (२) तृतीया बहुव्रीहिः (३) चतुर्थी बहुव्रीहिः (४) पञ्चमी बहुव्रीहिः (५) षष्ठी बहुव्रीहि (६) सप्तमी बहुव्रीहिः।

**सूत्रम् – अनेकमन्यपदार्थे ( २-२-२४ )**

वृत्तिः – अनेकं प्रथमान्तमन्यस्य पदस्यार्थे वर्तमानं वा समस्यते, स बहुव्रीहिः।

व्याख्या – न एकम् अनेकम्। अन्यच्च तत्पदमन्यपदम्, तस्यार्थोऽन्यदार्थस्तस्मिन् अन्यपदार्थे। अनेकम् इति प्रथमान्तमेकं पदम्, अन्यपदार्थे सप्तम्यन्तं द्वितीयं पदम्, द्विपदात्मकमिदं सूत्रम्।

उदाहरणानि – द्वितीया बहुव्रीहिः –

प्राप्तम् उदकं यं सः – प्राप्तोदकः (ग्रामः)

गतः क्रुद्धः सिहो यं सः गतक्रुद्धसिंहः (करी)

तृतीया बहुव्रीहिः –

जितः कामो येन सः जितकामः (शिवः)।

अर्जिता विख्याता सम्पत् येन सः – अर्जितविख्यातसम्पत्।

चतुर्थी बहुव्रीहिः –

उपहृतः पशुः यस्मै सः – उपहृतपशुः (रुद्रः)।

प्रदत्ताः सुन्दरा अश्वा यस्मै सः – प्रदत्तसुन्दराश्वः।

पञ्चमी बहुव्रीहिः –

उद्धृत ओदनो यस्याः सा – उद्धृतौदना (स्थाली)।

सम्पादितं भूरिधनं यस्मात् तत् सम्पादितभूरिधनम् (चातुर्यम्)।

षष्ठी बहुव्रीहिः – (पुंल्लिङ्गे)

पीतम् अम्बरं यस्य सः – पीताम्बरः (विष्णुः)।

एको ग्रामो ययोः तौ – एकग्रामौ (पान्थौ)।

एको गुरुः येषां ते – एकगुरवः (शिष्याः)।

**स्त्रीलिङ्गे –**

रक्तं वस्त्रं यस्याः सा – रक्तवस्त्रा (स्त्री)।

एकं मन्दिरं ययोः ते = एकमन्दिरे (जाये)

चारूणि भूषणानि यासां ताः चारुभूषणाः (स्त्रियः)।

**नपुंसकलिङ्गे –**

चित्रा भित्तयो यस्य तत् – चित्रभित्ति (गृहम्)।

अनर्घ्याणि रत्नानि ययोः ते = अनर्घ्यरत्ने (कटके)।

भूरि सत्वं येषां तानि – भूरिसत्त्वानि (शस्त्राणि)।

नीलम् उज्ज्वलं वपुः यस्य सः – नीलोज्ज्वलवपुः (कृष्णः)।

**सप्तमी बहुव्रीहिः –**

वीराः पुरुषाः यस्मिन् सः – वीरपुरुषकः (ग्रामः)।

खड्गिनः कुण्डलिनः वीराः यस्मिन् तत् – खड्गिकुण्डलिवीरम् (सैन्यम्)

**व्यधिकरणबहुव्रीहिः –**

चक्रं पाणौ यस्य सः – चक्रपाणिः (विष्णुः)।

मनुष्याद् जन्म यस्य सः – मनुष्यजन्मा।

साध्याभाववति न वृत्तिः यस्य सः – साध्याभाववदवृत्तिः।

**द्विपदे बहुपदे च बहुव्रीहि समासे प्रत्येकं यथासम्भवं नव भेदाः भवन्ति –**

(१) विशेषणपूर्वपदः – नीलः कण्ठः यस्य सः – नीलकण्ठः (शिवः)।

(२) विशेषणोत्तरपदः – अग्नयः आहिताः यैः ते – अग्न्याहिताः (ब्राह्मणाः)।

गतं शीघ्रं यस्य सः – गतशीघ्रः (वायुः)।

(३) उपमानपूर्वपदः – पद्मे इव नेत्रे यस्य सः – पद्मनेत्रः (विष्णुः)।

(४) उपमानोत्तरपदः – गतम् उड्डीनमिव यस्य सः – गतोड्डीनः (अश्वः)।

(५) विषयपूर्वपदः – न भवेद् इति बुद्धिः यस्य सः – न भवेद्बुद्धिः।

शिव इति शब्दो यस्य सः – शिवशब्दः (तपस्वी)।

अहम् इत्यभिमानो यस्य सः – अहमभिमानः (मूर्खः)।

(६) अवधारणापूर्वपदः – यश एव धनं यस्य सः – यशोधनः (विद्वान्)।

(७) अवधारणोत्तरपदः – भक्षितं जगद् एव येन सः – भक्षितजगत् (मृत्युः)।

(८) क्रमिकोभयपदः – गर्वितः पराजितः येन सः – गर्वितपराजितः (नृपः)।

(९) मध्यमपदलोपी – खरस्य मुखमिव मुखं यस्य सः – खरमुखः।

हरिणस्य अक्षिणी इव अक्षिणी यस्याः सा – हरिणाक्षी।

न विद्यमानः पुत्रः यस्य सः – अपुत्रः, अविद्यमानपुत्रो वा।

प्रपतितं पर्णं यस्य सः – प्रपर्णः, प्रपतितवर्णो वा।

**संख्योत्तरपदबहुव्रीहिः –**

**बहुव्रीहौ संख्येये डजबहुगणात् ( ५–४–७३ )**

संख्येये बहुव्रीहिस्तस्माड्डच् समासान्त इत्यर्थः।

दशानां समीपे ये सन्ति ते उपदशाः (नव एकादश वा)।

ति विंशतेर्डिति (६–४–१४२)

विंशतेर्भस्य टेर्लोपो डितित्यर्थः।

आसन्नाः विंशतेः – आसन्नविंशाः।

त्रिंशत अदूराः – अदूरत्रिंशाः।

चत्वारिंशतोऽधिकाः – अधिकचत्वारिंशाः।

द्वौ वा त्रयो वा – द्वित्राः।

द्विरावृत्ताः दश = द्विदशाः (विंशतिः)।

अन्तरालविषयकबहुव्रीहिः –

**दिङ्नामान्तराले – ( २–२–२६ )**

दिशो नामान्यन्तराले वाच्ये समासो भवतीति।

दक्षिणस्याः पूर्वस्याश्च दिशोऽन्तरालं दिग् – दक्षिणपूर्वा (आग्नेयी दिक्)

**तत्र तेनेदमिति सरूपे – ( २–२–२७ )**

सप्तम्यनते ग्रहणविषये सरूपे पदे तृतीयान्ते च प्रहरणविषये इदं युद्धं प्रवृत्तमित्यर्थे समस्येते कर्मव्यतिहारे।

**व्यतिहारविषयको बहुव्रीहिः –**

केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तम् – केशाकेशि।

दण्डैश्च दण्डैश्च प्रहृत्य इदं युद्धं प्रवृत्तम् – दण्डादण्डि।

**सहपूर्वपदबहुव्रीहिः –**

**तेन सहेति तुल्ययोगे – ( २–२–२८ )**

पुत्रेण सह यः सः – सपुत्रः (आगतः पिता), सहपुत्रो वा।

शिष्यैः सहः यः सः – सशिष्यः (आगत आचार्यः) सहशिष्यो वा।

## द्वन्द्वसमासः

प्रायेणोभयपदार्थप्रधानो द्वन्द्वसमासः पञ्चमः समासः।

**सूत्रम् - चार्थे द्वन्द्वः - ( २-२-२९ )**

वृत्तिः – अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते, स द्वन्द्वः।

व्याख्या – चस्य अर्थः चार्थः, तस्मिन् चार्थे, इति सप्तम्यन्तं पदम्। द्वन्द्व इति प्रथमान्तं पदम्। द्विपदात्मकमिदं सूत्रम्। अत्र 'अनेकमन्यपदार्थे' इति सूत्रेण अनेकम् इत्यस्य, 'सुबामन्त्रिते पराङ्गवत् स्वरे' इत्यनेन च सुप् इत्यस्य अनुवृत्ति आयाति 'समास' इत्यस्य विभाषायाश्च अधिकारः पूर्वत एव समायाति। सूत्रस्थश्चकारः चतुर्षु अर्थेषु प्रयुक्तोऽस्ति – यथा –

**समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः।**

**लक्षणोदाहरणानि** –

१. समुच्चयः – परस्परनिरपेक्षस्यानेकस्यैकस्मिन्नन्वयः समुच्चयः। यथा – ईश्वरं गुरुं च भजस्व।

२. अन्वाचयः – अन्यतरस्यानुसाङ्गिकत्वेनान्वयोऽन्वाचयः। यथा – भिक्षाम् अट गां चानय।

३. मिलितानामन्वयइतरेतरयोगः। यथा – धवखदिरौ छिन्धि।

४. समूहः समाहारः। यथा – संज्ञा च परिभाषा च अनयोः समाहारः संज्ञापरिभाषम्।

**द्वन्द्वे घि - ( २-२-३२ )**

द्वन्द्वे घि पूर्वं स्यात्। हरिहरौ।

**अजाद्यदन्तम् ( २-२-३३ )**

अजाद्यदन्तं पूर्वं प्रयोज्यम्। यथा – ईशकृष्णौ।

# द्वन्द्वसमासः

**अल्पाच्तरम् – ( २–२–३४ )**

अल्पसंख्यावाचकं पदं द्वन्द्वसमासे पूर्वं प्रयोज्यं स्यात्। यथा – शिवकेशवौ। रामलक्ष्मणौ।

**भ्रातुर्ज्यायसः ( वार्तिकम् )**

द्वन्द्वसमासे ज्येष्ठभ्रातुः पूर्वं प्रयुज्यते। यथा – युधिष्ठिरार्जुनौ।

**द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् – ( २–४–२ )**

प्राण्यङ्ग–तूर्याङ्ग–सेनाङ्गवाचकानां शब्दानां द्वन्द्वसमासे एकवद्भावः स्यात्। यथा –

प्राण्यङ्गवाचकः – पाणिपादम्।

तूर्याङ्गवाचकः – मार्दङ्गिकपाणविकम्।

सेनाङ्गवाचकः – रथिकाश्वारोहम्।

**येषां च विरोधः शाश्वतिकः – ( २–४–९ )**

येषां प्राणिनां परस्परं स्वाभाविको विरोधो भवति, तेषां द्वन्द्वसमासे एकवद्भावो जायते। यथा –

अहिनकुलम्।

गोव्याघ्रम्। काकोलूकम्।

**आनङ् ऋतो द्वन्द्वे – ( ६–३–२५ )**

विद्यायोनिसम्बन्धवाचिनामृदन्तानां द्वन्द्वसमासे आनङ् स्यादुत्तरपदे। यथा – होतापोतारौ। मातापितरौ।

**देवताद्वन्द्वे च – ( ६–३–२६ )**

द्वन्द्वे उत्तरपदे पूर्वपदस्यानङ् स्यादिति। यथा – मित्रावरुणौ।

**दिवो द्यावा – ( ६–३–२९ )**

दिवः द्यावा आदेशः स्यादुत्तरपदे परे। यथा – द्यावापृथिवी।

**द्वन्द्वाच्चुदषहान्तात्समाहारे – ( ५–४–१०६ )**

चवर्गान्ताद्दषहान्ताच्च द्वन्द्वात् टच्प्रत्ययः स्यात् समाहारे।

यथा – वाक्त्वचम्। त्वक्स्रजम्। शमीदृषदम्। वाक्त्विषम्। छत्रोपानहम्।

जयतु भारतम्                                        जयतु संस्कृतम्



# धन्यवादः